तत्र कस्यागन्तोः को निजो दोष इत्यपेक्षायामाह ।
“कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः ।
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥”
कामशोकभयात् कामशोकभयजादागन्तोर्वायुः कुप्यति । क्रोधात् क्रोधजादागन्तोः पित्तं कुप्यति । भूताभिषङ्गात् भूतावेशजादागन्तोः त्रयो मला दोषाः कुप्यन्ति इत्यर्थः । भूतसामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणाः मलाः ॥ * ॥

अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।
“श्यावास्यता विषकृते तथातीसार एव च ।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥”
विषकृते स्थावरजङ्गमविषभक्षणकृते ज्वरे । श्यावः शुक्लानुविद्धः कृष्णो वर्णः शाकवर्णो वा । अतीसारः स्थावरविषेणैव तस्याधोगामित्वात् । तोदः सूचीव्यधनेनेव व्यथा ॥ * ॥
“ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा ।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥”
कामजे समीहितकान्ताद्यप्राप्तिनिमित्तके ज्वरे । चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि । तानि यथा,—
“कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥”
भयात् भयजे ज्वरे प्रलापः । शोकाच्च चकारेण प्रलाप एवानुकृष्यते । कोपाच्च कोपादपि वेपथुर्भवति ॥ * ॥ ननु वेपथुर्व्वातस्य धर्म्मः तत् कथं क्रोधजे ज्वरे वेपथुः । यत उक्तम् । क्रोधात् पित्तमिति । उच्यते ।
“एकः प्रकुपितो दोष इतरानपि कोपयेत् ॥”
इति वचनात् पित्तकोपितवातजन्य एवात्र वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति । यत उक्तं विदेहेन । क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपनाविति । यत उक्तम् ।
“भूताभिषङ्गादुद्वेगो हास्यं रोदनकोपने ।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥”
भूताभिषङ्गोत्थो विषमज्वरो भवति । कदाचिदपि वेगवान् कदाचिच्छान्तवेग इत्यर्थः ॥
‘अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ।”
तृष्णा चेति चकारेण हारीतानुवादि वाग्भटोक्तञ्च बोद्धव्यम् । तद्यथा,—
“तत्राभिचारिकैर्म्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्व्वं मनस्ततो देहस्ततो विस्फोटविभ्रमैः ।
सदाहमूर्च्छाग्रस्तस्य प्रत्यहं वर्द्धते ज्वर इति ॥”
अथ तेषां चिकित्सा ।
“आगन्तुजे ज्वरे नैव नरः कुर्व्वन्ति लङ्घनम् ॥”
तथा च वाग्भटः ।
“शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥”
नेष्यते इति शेषः । अन्यच्च ।

“लङ्घनं न हित कामशोकचिन्ताप्रहारजे ।
भयभूतश्रमक्रोधलङ्घनैश्च क्षते ज्वरे ॥
किन्तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनम् ।
अभिघातज्वरे युञ्ज्यात् क्रियामुष्णविवर्ज्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा ।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्म्मध्यैश्च तथा मांसरसौदनैः ॥”
मेध्यैर्म्मेधाय हितैः ॥ * ॥
“वधबन्धश्रमात्यध्वभङ्गभ्रंशसमुद्भवान् ।
ज्वरानुपाचरेत् पूर्व्वं क्षीरमांसरसौदनैः ॥”
वधस्ताड़नं कर्णादिवेधो वा । भङ्गश्छेदभेदादिकः । भ्रंशो वृक्षादितः पतनम् ॥ * ॥
“अध्वश्रान्तेषु चाभ्यङ्गं दिवानिद्राञ्च कारयेत् ।
ओषधीगन्धविषजौ विषपित्तप्रबाधनैः ।
जयेत् कषायैर्म्मतिमान् सर्व्वगन्धकृतैर्भिषक् ॥”
सर्व्वगन्धमाह ।
“चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् ।
लवङ्गसहितञ्चैव सर्व्वगन्धं विनिर्द्दिशेत् ॥ * ॥
क्रोधजे पित्तजे काम्ये नार्य्याः सद्भावमेव च ।
आश्वासेनेष्टलाभेन वायोः प्रशमनेन च ॥
हर्षणैश्च शमं यान्ति कामशोकभयज्वराः ।
कामैरथ मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः ॥
सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥”
कामैः कामाविष्टैः । मनोज्ञैः धिक्कारादिभिर्भयजनकवचनैर्व्वा ॥ * ॥
“कामात क्रोधज्वरो नश्येत् क्रोधात् कामज्वरस्तथा ।
घातिताभ्यामुभाभ्याञ्च कामक्रोधज्वरक्षयः ॥”
घातिताभ्यामुभाभ्यां मनसि निगृहीताभ्यां कामक्रोधाभ्याम् ॥ * ॥
“भूतविद्यासमुद्दिष्टैर्बन्धावेशनताड़नैः ।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वैश्च मानसम् ॥”
ताड़नैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ॥
“सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति ।
एकद्वित्रिचतुर्भिर्द्दिवसैर्भूतज्वरं पुंसाम् ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिभिर्जयेत् ।
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहदुष्टिजौ ॥”
इत्यागन्तुज्वराधिकारः ॥ * ॥
अथ विषमज्वराधिकारमाह । तत्र विषमज्वरस्य निदानादिचिकित्सापर्य्यन्तं विषमज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ जीर्णज्वराधिकारः । तस्य निदानादिकं जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ दुर्व्वलजनितस्य ज्वरस्य चिकित्सामाह ।
“हरीतकी निम्बपत्रं नागरं सैन्धवोऽनलः ।
एषां चूर्णं सदा खादेत् दुर्व्वलज्वरशान्तये ॥”
इति हरीतक्यादि चूर्णम् ॥ * ॥
“अरुचिमनलमान्द्यं पीनसश्वासकासा-
नुदरमुदकदोषानाशु हन्यादशेषान् ।
जनयति तनुकान्तिं चित्तनेत्रप्रसादं
पलपरिमितशुण्ठीक्षोदसिद्धः कषायः ॥”
इति शुण्ठीक्वाथः ॥ * ॥

“विषं भागद्वयं दग्धकपर्द्दः पञ्चभागकः ।
मरिचं नवभागञ्च चूर्णं वस्त्रेण शोधयेत् ॥
आर्द्रकस्य रसेनास्य कुर्य्यान्मुद्गनिभां वटीम् ।
वारिणा वटिकायुग्मं प्रातः सायञ्च भक्षयेत् ॥
अयं रसो ज्वरे योज्यः सामे दुर्व्वलजेऽपि च ।
अजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥”
इति दुर्व्वलजेता रसः ॥ * ॥
“पटोलमुस्तामृतवल्लिवासकं
सनागरं धान्यकिराततिक्तकम् ।
कषायमेषां मधुना पिबन्नरो
निवारयेत् दुर्व्वलदोषमुल्वणम् ॥”
इति पटोलादिक्काथः ॥ * ॥
“किराततिक्तत्रिवृदम्बुपिप्पली-
विड़ङ्गविश्वाकटुरोहिणीरजः ।
निहन्ति लीढं मधुनातिसत्वरं
सुदुस्तरं दुर्व्वलदोषजं ज्वरम् ॥”
इति किराततिक्तादिचूर्णम् ॥ * ॥
“भोजनादौ नरैर्भुक्तं शुण्ठीराज्यभयोत्थितम् ।
कल्कं तु सहते नित्यं नानादेशोद्भवं जलम् ॥
महार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा ।
नानादेशसमुद्भूतंवारिदोषमपोहति ॥” * ॥
अथ साध्यस्य ज्वरस्य लक्षणमाह ।
“बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥”
ज्वरस्योपद्रवानाह ।
“श्वासमूर्च्छारुचिच्छर्द्दितृष्णातीसारविड्ग्रहाः ।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥” * ॥
प्रसङ्गादुपद्रवाणां चिकित्सायां विशेषमाह ।
“संजातोपद्रवो व्याधिस्त्याज्यो न स्याच्चिकित्सकैः ।
व्याधौ शान्ते प्रशाम्यन्ति सद्यः सर्व्वेऽप्युपद्रवाः ॥
अतो व्याधिं जयेद्यत्नात् पूर्व्वं पश्चादुपद्रवम् ।
भिषग्यः कुशलः सोऽत्र जयेत् पूर्व्वमुपद्रवम् ॥
तेष्वपि प्रचुरेषु प्राङ्नाशयेदाशुकारिणम् ।
मूलव्याधिं जयेत् पूर्व्वं जेयो यो वा भवेद्बली ॥
अविरोधेन वा कुर्य्यादुभयोरपि च क्रियाम् ॥”
तत्र ज्वरे श्वासस्य चिकित्सा ।
“सिंही व्याघ्री ताम्रमूली पटोली
शृङ्गी पद्मा पुष्करं रोहिणी च ।
शाकं शटी शैलमल्लाश्च बीजं
श्वासं हन्यात् सन्निपाते दशाङ्गः ॥”
सिंही वड़ीकटैया । व्याघ्री कटैया । ताम्रमूली दुरालभा । पद्मा भार्गी । रोहिणी कटुकी । शैलमल्ली कोरैया । इति दशाङ्गो योगः ॥ * ॥
“भार्गीनिम्बघनाभयामृतलताभूनिम्बवासाविषाचायन्तीकटुकावचात्रिकटुकश्योनाकशक्रद्रुमैः ।
रास्नायासपटोलपाटलिशटीदार्व्वीविशालात्रिवृद्-
ब्राह्मीपुष्करसिंहिकाद्वयनिशाधात्र्यब्दवेदद्रुमैः ॥
क्वाथोऽयं खलु सन्निपातनिवहान् द्वात्रिंशतां पानतो ।
दुर्द्धर्षान्निजतेजसा विजयते सर्पान् गरुत्मानिव